P: ISSN NO.: 2321-290X RNI : UPBIL/2013/55327 VOL-6* ISSUE-7* (Part-1) March- 2019
E: ISSN NO.: 2349-980X **Shrinkhla Ek Shodhparak Vaicharik Patrika**

# बुद्धावतारः–सामाजिकपरिवर्तनम्


## सारांश

सत्यसङ्कल्पयुतस्य परब्रह्मणः गौरवातिशयंजगत्यस्मिन् विचित्रात्मनास्फुरितीतिनास्तिकश्चित् संशयलेशावकाशः। वैशिष्ट्यञ्च तस्य पुराणेषुपुराणकृद्भिः अनन्यरूपेणवर्णितंप्राप्यते।अवतारः पुराणानांप्रमुखविषयेषुअन्यतमः। तत्र विष्णुमाधारिकृत्य तस्य विविधानांअवताराणांवर्णनमुपलभ्यते।भागवतपुराणस्य स्थानत्रयेषु एतेषांअवताराणां संख्या द्वाविशंति–चतुर्विंशति–षोडशश्च रूपेणप्राप्यन्ते। भागवतेवर्णितः चतुर्विंशत्यवतारापरम्परायाम् ऐतिहासिकाः बौद्धजैनसाहित्ययोः प्रचलितः चतुर्विंशत्यवतारैः सहः तुलयन्ति। भागवतस्य द्वितीयस्कन्धस्य सप्तमाध्यायेभगवतः विष्णोः लीलावतारमाध्यमेनचतुर्विंशत्यवताराणांविशदविवरणमुपलभ्यते। एषुचतुर्विंशत्यवततारेषु त्रयोविंशत्यवतारूपेणबुद्धः गृह्यते।तस्योल्लेख वैदिकवाङ्मये न प्राप्यते।परन्तुपरवर्त्तिसाहित्ये यथामहाभारतेरामायणे च प्राप्यतेतथालौकिकसाहित्यान्तरेषुबुद्धावतारस्य वर्णनंसमुपलभ्यते। अपि च भदन्तभिक्षुकृत महायानेबौद्धजातक–दशरथजातक–करण्डव्युहादिषुकाव्येषुभगवान् बुद्धः विष्णोः अवतारतुल्यंगृह्यते। तस्य प्रणीतः धर्मः सर्वप्रमुखधर्मेषुअन्यतमः अस्ति। सः समयानुकुलताहेतोः तथासमाजस्य विविधाः अवस्थाः परिलक्ष्य अस्य धर्मस्य स्थापनं कृतवान् यदद्यापि एतद्धर्मस्य प्रभावः समग्रविश्वेवास्तवरूपेणप्रतिपाद्यते। भगवान् बुद्धः स्ववाणींमागधीभाषायांप्रचारितवान्, यदधुनापालीनाम्नाइतिज्ञायते। तस्योपदेशाः बौद्धधर्मस्य धर्मग्रन्थसदृशः त्रिपिटकं (विनय–सूत्र–अभिधम्म) रूपेणमानवैः गृह्यते। एतस्मिन् धर्मेबुद्धिवादः, मानवस्य समानाधिकारः, सदाचारस्य महत्त्वं, अहिंसायाः पालनंतथाआत्मोन्नतिनिमित्तंप्रचेष्टावर्णितमस्ति। एतैः कारणैः समाजेअस्य धर्मस्य महत्त्वंपरिलक्ष्यते। शोधलेखेऽस्मिन् अस्यैवबौद्धावतारस्य सामाजिकपरिवर्तनविषयेचर्च्चाकरिष्यते।


**मुख्य शब्द** : अवतारः, उपासना, निर्गुणः, सगुणः, ईश्वरः, अंशः, अंशांशः, आवेशः, बुद्धः, भागवत, गीतगोविन्दः, विनयपत्रिका, शान्तिभिक्षुः, कल्किः, वैष्णवः, धर्मचक्रम्, असंगः।

**अनिलप्रतापगीरिः**
सहायकाचार्यः
पण्डिच्चेरीविश्वविद्यालयः
पुड्डुच्चेरी



**श्रीदेवाशीषमिश्रः**
शोधच्छात्रः
पण्डिच्चेरीविश्वविद्यालयः
पुड्डुच्चेरी

**प्रस्तावना**

अवतारवादः भारतीयपरम्परायाः महत्वपूर्णोविषयोऽस्ति। अवोपसर्गपूर्वकात् 'तृ' धातोः अवेतृस्त्रार्घञ्[1] इतिपाणिनीयसूत्रद्वारा घञ् प्रत्यये वृद्धौसत्यांरपरे च कृतेऽवतारशब्दोनिष्पद्यते, यस्य शाब्दिकोऽर्थोभवतिउपरिष्टादधोऽवतरणम्। परन्तुतात्त्विकदृष्ट्याअव्यक्तरूपात् व्यक्तरूपेण धरापृष्ठे अवतरणम्। सामान्यतयानूतनं शरीरं धृत्वामहीतले अवतरणम्। श्रीमद्भगवद्गीतायाम् एतद्विषयेकथ्यते यत्–

**अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत।**
**अव्यक्तनिधानान्येव तत्र का परिदेवना।।**[2]

स्मृत्यनुसारंमानवस्य विपत्तौसत्यांपृथिव्यां च धर्मस्य ग्लानौसत्यांभगवान् स्वस्य मूलस्वरूपंपरित्यज्य धरावतरंकरोति। गीतायांकथ्यते यत्–

**यदा यदाहि धर्मस्य ग्लानिर्भवतिभारत**
**अभ्युत्थानमधर्मस्य तदात्मानंसृजाम्यहम्।**
**परित्राणाय साधूनांविनाशाय च दुष्कृताम्**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।**[3]

पुनश्चगीतायांअर्जुनेनपृष्टस्य प्रश्नस्य उत्तरंदात्तुंभगवान् स्वस्य जन्मसम्बन्धि–रहस्यविषयमुन्मोचयितुंकथयति यत्–

**बहूनि मे व्यतीतानिजन्मानितवचार्जुन।**
**तान्यहंवेदसर्वाणि न त्वंवेत्थपरन्तप।।**[4]

निर्गुणरूपीईश्वरः भक्तिद्वारावशीभूत्वासगुणरूपेअवतरति। अयंअवतारः न केवलं एकस्य जीवन्मुक्तिनिमित्तं, परन्तुसर्वेषां कृतेभवति। अयंअवतारः भक्तानांउपासनायाः आधारभूतमस्ति। तेषांउन्नत्तिनिमित्तंतथाभगत्प्राप्तिनिमित्तम् ईश्वरः

अवतरति। अवतार–सर्वप्राणीगतात्मतत्वयोः मध्ये प्रभेदः नास्ति। फलतः निर्गुण–सगुणभक्तयोर्मध्ये प्रभेदः नास्तिइतिमन्यते। अस्य विषयेभागवतेकथ्यते–

**सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः।**
**भूतानिभगवत्यात्मन्येषभागवतोत्तमः।।**[5]

अर्थात् ईश्वरः सर्वेषुप्राणिषुआत्मरूपेणतिष्ठतिइति एतद् दिव्यज्ञानः येनप्राप्यते सः सर्वश्रेष्ठभक्तरूपेणपरिगण्यते। यादृशः श्रीराम–श्रीकृष्णश्चभगवतः अवतारौस्तः, तादृशः अन्येसर्वेईश्वरस्य अवताराः भवन्ति। तस्य नामकीर्तनस्य महिमासर्वत्र परिलक्ष्यते। अस्य सार्थकताप्रतिपादनाय भगवान् पद्मपुराणे कार्तिकव्रतप्रसङ्गे कथयति, यत्–

**नाहंवसामिवैकुण्ठे योगिनांहृदयेन च।**
**मद्भक्ता यत्र गायन्ति तत्र तिष्ठामिनारद।।**[6]

**अवताराणांभेदाः**

भगवान् विष्णुः कार्यवशतः स्वयंनवीनरूपं धृत्वा धरापृष्ठे अवतरति। रूपमिदंकदाप्रयोजनवशतः, पुनः नूतनशरीरधारणम्। एतस्मैकारणाय भगवतः अवताराणांनामकरणंविविधाः भवन्ति। गर्गसंहितायांभगवतः अंश–अंशांश–आवेश–कला–पूर्णावताररूपेणअवताराणांवर्णनं वर्ण्यते, यथा–

**अशोऽशांशस्तथावेशः कलापूर्णः प्रकथ्यते।**
**व्यासाद्यैश्चस्मृतिः षष्ठः परिपूर्णतमः स्वयम्।।**[7]

भागवतपुराणानुसरेण षोडशकलयापरिपूर्णावतारः पूर्णावतारः इतिकथ्यते।[8] पूर्णावतारेज्ञान–पराक्रम–आनन्दरूपशक्तिकारणात् राम–श्रीकृष्णश्चपूर्णावतारः इतिज्ञायते।

विविधरूपेष्ववतारेषुअंशावतारः अन्यतमः। अयञ्च अवतारः एकं देशंकालम् अवस्थांजनञ्च प्रतिहितार्थंअंशरूपेणअवतरति।आनवकलात्पञ्चदशकलाधारिणअवताराः अंशावतारः इतिकथ्यते। ऋग्वेदीयेपुरुषसूक्तेअंशावतारस्य प्रभावः परिलक्ष्यते।[9] गर्गसंहितानुसरेण यस्मिन् शरीरेविष्णुः प्रविश्य स्वकार्यंसम्पादयति स आवेशावतारः इतिकथ्यते।[10] ततः विष्ण्ववतारीभगवान् परशुरामआवेशावतारीइतिस्वीक्रियते। भगवान् एतस्मिन् अवतारेदिव्यकर्माणिसम्पाद्य संसारेतस्य स्वप्रभावंप्रतिष्ठापयति।गीतायांश्रीकृष्णेनप्रोक्तमस्ति यत्–

**गामाविश्य च भूतानि धारायाम्यहमोजसा।**
**पुष्णामिचौषधिः सर्वाः सोमोभूत्वारसात्मकः।।**
**अहंवैश्वानरोभूत्वाप्राणिनांदेहमाश्रितः।**
**प्राणापानसमायुक्तः पचाम्यन्नंचतुर्विधम्।।**
**सर्वस्य चाहंहृदिसन्निविष्टोमतः स्मृतिर्ज्ञानमपोहनं च।**
**वेदैश्चसर्वैरहमेववेद्योवेदान्तकृद्वेदविदेवचाहम्।।**[11]

सत्यादयोः युगाः ब्रह्मणः स्वरूपमस्ति। एकसहस्रचतुर्युगः ब्रह्मणः एकः दिवसमितिस्वीक्रियते। अतः तस्मिन् यस्य ज्ञानमस्ति, सः कालतत्त्वज्ञइतिज्ञायते। अतः ब्रह्मइमंकालतत्त्वंजानाति। अयंविषयः महाभारतेपरिलक्ष्यते। भागवतपुराणेकालः भगवतः स्वरूपमितिकथ्यते। अत्र भगवान् स्वयमात्मनः अनेकरूपविषयेज्ञानंप्रददाति। यथा–

**आद्योऽवतारः पुरुषः परस्य**
**कालः स्वभावः सदसन्मनश्च।**
**दिव्यंविकारोगुणइन्द्रियाणि**
**विराट् स्वराट् स्थास्नुचरिष्णुभूम्नः।।**[12]

कपिलदेवहूतिसम्वादेकाल एव जगतः पदार्थानांहेतुत्वेनप्रतिपादितमस्ति। प्रकृति–पुरुषौकालस्य रूपे तथा एतस्मात् जायेते।[13] विष्णुपुराणेऽपिभगवतः कालस्वरूपस्य वर्णनमुपलभ्यते। अत्र परब्रह्महीव्यक्त–अव्यक्त–पुरुष–कालत्वेनवर्ण्यते। एवंप्रकारेणअवताराणांभेदाः विविधेषु शास्त्रेषुविविधरूपैः अङ्गीक्रियते।

**बुद्धावतारस्य उद्भववर्णनञ्च**

विष्ण्ववतारः पुराणानांप्रमुखविषयेषुअन्यतमः। तत्र विष्णुंआधारिकृत्य तस्य विविधानामवतारस्वरूपाणांवर्णनमुपलभ्यते।भागवतपुराणेभगवतः विष्णोः सहस्रसंख्यात्मका–वताराविषयेप्राप्यते, यथा–

**अवताराह्यसंख्येयाहरेः सत्त्वनिधेर्द्विजाः।**
**यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः।।**[14]

परन्तुस्थानत्रयेषु एतेषांअवताराणां संख्या द्वाविशंति–चतुर्विंशति–षोडशरूपेणप्राप्यन्ते।[15] भागवतेवर्णिताचतुर्विंशति–अवतारापरम्परा ऐतिहासिकैः बौद्धजैनसाहित्ययोः प्रचलितः चतुर्विंशति–अवतारैः सहः तुल्यन्ते। भागवतस्य द्वितीयस्कन्धस्य सप्तमाध्यायेभगवतः विष्णोः लीलावतारमाध्यमेनचतुर्विंशत्यवताराणांविशदविवरणमुपलभ्यते। एतेषुचतुर्विंशत्यवतारेषु त्रयोविंशतितम–अवतारूपेणवुद्धः गृह्यते।

**हिन्दुग्रन्थेषुभगवान् बुद्धः**

वैदिकवाङ्मये विष्ण्ववतारिबुद्धस्य उल्लेखो न प्राप्यते।रामायणेबुद्धस्य विवरणंलभ्यते।[16] रामायणेबुद्धस्य स्वरूपंवेदविरोधिरूपेणउल्लिखतमस्ति। तत्र वेदविरोधिकारणात् दण्डः प्राप्यमितिकथ्यते। महाभारतस्य प्रमुखदशावतारेषुअपितस्य उल्लेखं नास्ति। परन्तुदक्षिणभारतीयसंस्करणेमहाभारतीये शान्तिपर्वेभीष्मशरशय्यासमये कृष्णस्य स्तुतिकाले सः बुद्धस्य उल्लेखं कृत्य कथयति यत् सृष्टेः रक्षानिमित्तंदानवान् अधिकृत्य कृष्णः बुद्धत्वेनप्रकटिष्यति।[17] कतिपयप्रमुखपुराणेषुअपिबुद्धस्य प्रत्यक्षावतारविषयेदेवतानां रक्षाकृतेअवतारीपुरुषरूपेण वर्ण्यते।विष्णुपुराणेविष्णुः मायामोहनामानं धृत्वाअवतरति।[18] धर्मसाहाय्येनदैत्यान् विविधपशुवलिभ्यः तथावेदेभ्यः अवरोधयितुंसमर्थः असीत्।[19] पुनश्चबुध्यत बुध्यध्वंबुध्यतश्चइत्यादि शब्दमाध्यमेनदैत्यान् तिरोहित्वाबुद्धधर्मंस्थापितवान्।[20]

बुद्घावतारविषयेभागवतपुराणस्य स्थानत्रयेषुउल्लेख्योपलभ्यते। प्रथमस्कन्धस्य तृतीयाध्यायेतस्य विषयेवर्णनमस्ति। तदनुसरेणकलियुगस्य प्रारम्भेअजनसूतरूपेण मगधदेशेजन्मलाभं कृत्वादेवविरोधिदैत्यान् मोहयति।[21] पुनश्च द्वितीयस्कन्धे यदादानवाः वेदमार्गम् अवलम्ब्य मयदानेवेन कृत्वानगर्य्यां प्रविश्य जनानांसत्यंविनश्यन्ति, तदाभगवान् बुद्धावतारेणजनानां कृतेविविधान् उपदेशान् प्रददाति।[22] अपितु एकादशस्कन्धस्य चतुर्थाध्यायस्य विवरणानुसरंभगवान् विष्णुः बुद्धरूपंप्रकटयित्वातर्कवितर्केणदानवान् यज्ञकार्यात् निवृत्य तान् विविधाः उपदेशाः दास्यति।[23] अन्यञ्च षष्ठस्कन्धेभगवान्बुद्धः पाखण्डगणात् तथासांसारिकप्रमादात् रक्षतुइतिप्रार्थनालभ्यते। दशमस्कन्धेऽपिअहिंसाधर्मस्य प्रवर्त्तकरूपेणबुद्धावतारस्य उल्लेख प्राप्यते।[24]

अन्यपुराणेष्वपिबुद्धावतारस्य प्रासंगिकतासमुपलभ्यते। गरुडपुराणेकथ्यते यत् –भगवान् विष्णुः स्वयंजीनसुतरूपेणअवतरिष्यति।पश्चात् सः दानवानां कृ तेविविधोपदेशान् दास्यति।[25] अग्निपुराणेविष्णुः शुद्धोदनस्य मायामोहनाम्नासुतरूपेणजन्मलाभं कृत्वादानवान् वेदधर्मकर्मात् निवारयिष्यति।[26] मत्स्यपुराणेभगवान् बुद्धः चन्द्रमासुतरूपेणअजायत्। ततः सः अर्थशास्त्रवित् हस्तिशास्त्रस्य प्रवर्त्तकरूपेण च प्रसिद्धः जातः।[27] तत् शास्त्रं राजपुत्रीय इतिज्ञायते। एतस्य शास्त्रस्य नामानुसरेणचन्द्रमायाः पुत्रस्य नाम राजपुत्रः बुद्धः वेतिमन्यते।[28]

**लौकिकसाहित्येबुद्धः**

लौकिकसंस्कृतसाहित्येबहवः कवयः भगवन्तंबुद्धं विष्ण्ववताररूपेणस्वीकृत्वास्वकाव्येवर्णनंकुर्वन्ति। प्रथमतः क्षेमेन्द्रकृतदशावतारचरितेनवमावताररूपेणबुद्धः विराजते।तस्य विषयेवर्णयितुं स वक्ति यत् – सः शाक्यवंशराजा शुद्धोदनसुतरूपेणविश्वेपरिचितः प्राप्स्यति।[29] कामदेवः तस्य प्रगाढध्यानं दृष्ट्वा ध्यानभग्ननिमित्तंतस्य स्वजाताः सुन्दरीनारीः प्रेषयति।[30] परन्तुताबुद्धस्य ध्यानभग्नकर्त्तुमसमर्थाः अभवन्।[31] तस्य बुद्धस्य विषयेकथयति यत् –

**अथ स भगवान्कृत्वासर्वजगज्जिनभास्कर–**
**स्तिमिररहितंज्ञानालोकैः क्रमाद् गुणिबान्धवः।**
**जनकरुणया सद्धर्माख्यं निधाय परंवपु–**
**स्तरणशरणंसंसाराब्धावभूत् पुनरच्युतः।।[32]**

अर्थात् बुद्धःसूर्यसदृशः स्वस्य ज्ञानंप्रकाशयित्वासर्वेषांप्राणीनांअज्ञानान्धकारान् निवारयतितथापापान् मोचयति।मानवानां कृते करुणानिमित्तं सद्धर्मशरीरं धृत्वा शेषेविष्णुस्वरूपेपरिणतंभविष्यति।

पुनश्चजयदेवकृ तौगीतगोविन्देदशावतारेषुनवमावताररूपेणबुद्धावतारवर्ण्यते। अत्र सः वेदविहितपशुहिंसांनिन्दति।अस्मिन् काव्येप्रतिपादितात् बुद्धावतारात् सदयहृदय दर्शितपशुघातम् इतिवाक्येनस्पष्टंज्ञायते यत् बुद्धः वेदविरोधीनासीत् , परन्तु यज्ञकार्येविहितस्य पशुवलेः विरोधीआसीत्।अतः अहिंसावाद एव बौद्धधर्मस्समूलनीतीतिस्वीक्रियते।[33]

पुनश्चआदिशंकारचार्यः स्वकृ तौदशावतारस्तुतौबुद्धस्य विषयेकथयति यत् –

**धराबद्धपद्मासनस्थाङ्घ्रियष्टि–**
**र्नियम्यानिलंन्यस्तनासाग्रदृष्टिः।**
**य आस्तेकलौ योगीनांचक्रवर्ती**
**स बुद्धःप्रबुद्धोऽस्तुसच्चित्तवर्ती।।**

अर्थात् भगवान्बुद्धःकलियुगे योगीनांचक्रवर्तीसदृशः प्रादुर्भूतः।पद्मासनेउसित्वास्वप्राणान् संयम्य तपस्यारतबुद्धः अस्मासुचित्तेषुप्रकाश्यते।आचार्यलक्ष्मणदेशिकेन्द्रेणरचिते शारदातिलकेविष्ण्ववतारिबुद्धविषयेप्रोक्तमस्ति यत्–

**पुरापुराणानसुरान्विजेतुं**
**सम्भावयन् धीवरचिह्नवेषम।**
**चकार यः शास्त्रममोघकल्पं**
**त मूलभूतप्रणतोस्मिबुद्धम्।।[34]**

अर्थात् प्रचीनकालेदेवानामुपरिविजयंलब्ध्वा तथाचीवरं धृत्वा एवंअमोघशास्त्रस्य प्रणेताबुद्धरूपविष्णवे नमः।अपि च श्रीतुलसीदासः स्वविनयपत्रिकायांदशावतारस्तुतौभगवान्बुद्धं पशुवद्धमूलकयज्ञहिंसायाः निन्दकरूपेणस्तूयते यत् –

**प्रबलपाखण्डमहि–मण्डलाकुलदेखि**
**निन्द्यकृत अखिलं मख कर्म–जालं।**
**शुद्ध बोधैक घनज्ञान–गुणधामअज**
**बौद्धावतारवन्दे कृपालं।।[35]**

बृहत्पाराशरहोरशास्त्रस्य द्वितीयावतारक्रमवर्णनाध्यायेविष्णोः दशावतारेणसहग्रहानां तादात्म्यप्रसङ्गे बुद्धं बुधग्रहसदृशमितिप्रतिपादयति, यथा–

**रामोऽवतारः सूर्यस्य चन्द्रस्य यदुनायकः।**
**नृसिंहोभूमिपुत्रस्य बुद्धःसोमसुतस्य च।।[36]**

उपर्युक्तः विवरणानुसरंस्पष्टंज्ञायते यत् भगवान्बुद्धः सनातनधर्मस्य अवतारीदेवेषुअन्यतमः। यथा धर्मस्य स्थापनाय भगवान् विष्णुः रामादीनां शरीरं धृत्वाअवतरति, तथापशुहिंसायाः विनाशाय बुद्धशरीरेअवतरति।

बौद्धजातकेषुबुद्धः रामस्य पुनरावताररूपेणवर्ण्यते।भदन्तशान्तिभिक्षु–मतानुसरेणसम्भाव्य कल्कि–अवतारसदृशः भगवान्बुद्धस्य भविष्यत्कालेमैत्रेयनाम्नाअवतारभविष्यति।[37] कल्किपुराणेऽपिकल्किसमकक्षः प्रतिद्वन्द्विसदृशः एकस्य बुद्धस्य आविर्भावभविष्यति, यः स्वयंकल्किनासह युद्धं करिष्यति।[38] बौद्धधर्मस्य सम्बन्धः वैष्णवधर्मेणसहाऽसीत्। एतस्याः प्रामाणिकतांप्रतिपादयितुंविविधानामैतिहासिकानां मतं संगृह्यते। यथारायडेविड्समहोदयानुसरंतस्मिन् समयेविविधहिन्दुदेवतानांप्रतिमूर्तीबौद्धकृ तत्वेनबौद्धसम्प्रदायेगृहीतः।[39] फलतः एतादृशा कार्येणउभयोः धर्मयोः सुसम्पर्कः स्थापितः।

पुनश्चओडिआभाषायांप्रकाशितः "दारुब्रह्मः"नाम्निपद्यकाव्येपुरीस्थितः जगन्नाथः बुद्धस्य अवताररूपेणस्वीक्रियते। बुद्धस्य अन्यावताररूपेणज्ञातः अवलोकितेश्वरः, यस्य प्रतिकात्मकः चिह्नसदृशः विष्णौप्राप्यते। करण्डव्युहानुसरं यदाभगवानवलोकितेश्वरः लङ्कायां प्रविशति, तदा तत्र दुष्टनार्यः तंप्राप्तुमिच्छन्ति।परन्तु सः उपदेशवलेनतां रक्षति।[40] दशरथजातकानुसरेणबुद्धः स्वयंरामरूपेणवारणासीनगर्यांजन्मलाभं कृतवान्।[51] पुनश्चकरण्डव्युहेअवलोकितेश्वरसमकक्षमितिमन्यते। तत्र तस्य सहस्रभुजविषयेवर्णनमस्ति, अपि च सूर्यचन्द्रौतस्य नेत्रौ, ब्रह्माअन्यदेवाश्चतस्य स्कन्धः, नारायणः हृदयं, सरस्वतीदन्ताश्चभवन्ति। सः "ओम् मणिपद्मेहुं"इतिमन्त्रेणस्तूयते।

**बुद्धावतारस्य सामाजिकप्रभावः**

बौद्धधर्मः सर्वप्रमुखधर्मेषुअन्यतमः अस्ति।भगवान् बुद्धः विभूतिदृशः पृथिवीपृष्ठे अवतीर्यअस्य धर्मस्य प्रतिष्ठां कृ तवान्। सः समयानुकुलताहेतोः तथासमाजस्य विविधाः अवस्थाः परिलक्ष्य अस्य धर्मस्य स्थापनं कृतवान्। तदधुनापिसमग्रविश्वेवास्तवरूपेणप्रभावंप्रतिपादयति। बुद्धस्य धर्मचक्रपरिवर्त्तनानन्तरंतेनप्रोक्तमार्यसत्यचतुष्टयं यथा दुःखं, दुःखसमुदयः, दुःखनिरोधः दुःखनिरोधोपायः च प्रतिपदंभारतीयसमाजेस्वमहत्त्वंप्रतिष्ठापयति।बुद्धप्रणीताष्टाङ्गिकमार्गस्य समाजेऽपिस्वीकृतिः उपलभ्यते।तेसम्यक् दृष्टिः, सम्यक् संकल्पः सम्यक् वचनं, सम्यक् कर्मान्तः, सम्यक् आजीवः सम्यकिव्यायामः, सम्यक् स्मृतिः सम्यक्

समाधिश्चास्ति। एतेमानवस्य मोक्षप्राप्त्यर्थंसहायकाः भवन्तीतिजनाः गृहीतवन्तः। एते अष्टाङ्गमार्गाः त्रिषुसाधनेषुविभज्यन्ते। यथाप्रज्ञा, शीलंसमाधिश्च। एतद्विषये धम्मपदेकथ्यते यत् मार्गणामष्टांगिकः श्रेष्ठः।

भगवान् बुद्धःस्ववाणींमागधीभाषायांप्रचारितवान्, यत् इदानींकालेपालीनाम्नाज्ञायते।तस्योपदेशाः बौद्धधर्मस्य धर्मग्रन्थसदृशः त्रिपिटकं (विनय–सूत्र–अभिधम्म) रूपेणमानवैः गृह्यते।

(१) **विनयपिटकः**बुद्धेनभिक्षुणां कृतेविविधाः उपदेशाः, नियमाः तेषां च पालनं यस्मिन् पुस्तकेवर्णितंप्राप्यते, तत् विनयपिटकनाम्नाइति प्रख्यायते।पुस्तकमिदंतात्कालिकसमाजेप्रचलितप्रथानांसुदिग्दर्शनाय मुख्योपयुक्तः आसीत्।

(२) **सुत्तपिटकः**–अस्मिन् ग्रन्थेभगवतः बुद्धस्य बौद्धधर्मसम्बन्धीनीविविधधर्मोपदेशनांसंकलनमस्ति।तथातस्य जीवनचरितविषयेविशदविवरणंप्राप्यते।

(३) **अभिधम्मपिटकः**–आर्याऽसंगकृतः महायानसूत्रालंकारेअभिमुख्यतः आभिक्ष्ण्याद् अभिधम्मइतिउच्यते। यत् –**अभिमुख्यतोऽथाभिक्ष्ण्यादभिभवगतिताभिधर्मश्च**।[42] अस्य नामकरणाय कारणचतुष्टयंस्वीक्रियते, यथासत्यं, वोधिः, विमोक्षः सुखञ्चेति।

भगवान्बुद्धेनप्रचारितोपदेशाः ये खलुसुत्तपिटकेप्राप्यन्तेतेषांसूक्ष्मसिद्धान्तानांस्थूलरूपंतथा शास्त्रदृष्ट्याविस्तृतविवेचनंहिअभिधम्मपिटकस्य मूललक्ष्यं वर्त्तते।

भारतात् बहिरपिबौद्धधर्मस्य वहुलप्रचारंप्राप्यन्ते।अशोकस्य शासनकालेअस्य प्रचारातिशयः बहुषुदेशान्तरेषुजातम्।पश्चात् तत्पुत्रमहेन्द्रेणकन्यासंघमित्रया च सिंहलप्रदेशेस्थविरवादीबौद्धधर्मस्य (हीनयान)प्रसारं जातम्। प्रथमशताब्द्यांकनिष्कः चतुर्थसंगोष्ठ्यांसर्वास्तिवादिधर्मस्य (महायान) प्रचलनं कृतवान्।किन्तुपञ्चमशताब्द्यांपरिब्राजकेनफाहियान्महोदयेन, सप्तमशताब्द्यां च परिब्राजकेन ह्वेनसांगमहोदयेनबौद्धधर्मस्य प्रचारमूल्यबोधञ्च तत्कालिनसमाजेकिदृशमासीत् तयोः जीवनचरितयोः प्रतिफलितमस्ति।

**बौद्धिकप्रभावः**

यदिसूक्ष्मदृष्ट्याविचरिष्यामः ततः ज्ञातुमिदं शक्यते यत् बौद्धधर्मस्य विशेषताबुद्धिवादः युक्तिवादः वा अस्ति।बुद्धस्य प्राक् वेदेवर्णितानां धार्मिकप्रमाणानांसमाजे प्रधानताआसीत्।अस्य प्रामाणिकतावेदेवर्णितः धर्मजिज्ञासमानानांप्रमाणंपरमंश्रुतः इतिवाक्येनज्ञायते। यद्यपि स्वयंभगवान् कृष्णः गीतायांकथितेनबुद्धौ शरणमन्विन्छइतिवाक्येनबुद्धिवादस्य महत्त्वंस्वीक्रियते, परन्तुपश्चात् धार्मिकक्षेत्रे तस्मात् शास्त्रं प्रमाणंतेकार्याकार्यव्यवस्थितौ[43] इतिवाक्येन शास्त्रस्य प्रामाणिकतामन्यते।

किन्तु शक्यमुनिबुद्धः स्वयंप्रज्ञावलेनबुद्धिवादस्य शास्त्रेणसहतुलनां कृत्वाकथयति यत् मानवः स्वप्रज्ञयासत्यस्य अनुसन्धानं कृत्वातर्कवितर्काभ्यांपरिक्षिया च सत्तत्त्वस्य ज्ञानलाभंकुर्यात्। एतदर्थंभगवान्बुद्धः प्रत्येकंमानवंप्रतिस्वस्य पथप्रदर्शकः भवितुम् उपदेशाः अददात्।अतः एतेनप्रकारेणबुद्धः मानवस्य कल्याणनिमित्तंस्वप्रज्ञामुपरिविश्वासः स्थापनं कृतवान्।तस्मिन् प्राचीनसमये यतोऽहिस्वविचारस्य प्रासङ्गिकता नासीत्, तथा शास्त्रमभितः तर्कवितर्काभ्यांस्थानंनासीत्, किन्तुबुद्धः स्वस्य मतस्य स्थापनं कृत्वाबुद्धिवादंप्रतिष्ठितं कृतवान्।फलतः जनाः स्वेच्छयाबौद्धधर्मंस्वीकृतवन्तः।

बौद्धधर्मस्य द्वितीयविशेषताऽऽसीत् यत् सर्वेषांमानवानांप्रति समदृष्टिभावः।वैदिकधर्मः यद्यपि सर्वजनकल्याणप्रदायकआसीत् तथापि तत्र सर्वेषांमनुष्याणां कृतेसमानाधिकारः नास्ति। यद्यपि कृष्णः गीतायांवर्णानांप्रभेदंनिवारयित्वाप्रोक्तमस्ति यत् –

**विद्याविनयसम्पन्नेब्राह्मणेगविहस्तिनि।**
**शुनिचौव श्वपाके च पण्डिताः समदर्शिनः।।**[44]

यदाबौद्धधर्मस्य प्रादुर्भावमभवन् तदावेदस्यापिप्राधान्यमासीत्। यज्ञयागादीनामनुष्ठानंउत्साहेनपाल्यते।वेदपाठः केवलं द्विजातीयानां कृतेअत्यावश्यकमासीत्।परन्तु शुद्रंप्रतिइयंव्यवस्थानासीत्।अपि च नारीणां कृतेवेदाध्यनस्य आवश्यकतानास्ति।भागवतेऽपिव्यासेनकथ्यते यत् –

**स्त्रीशूद्रद्विजबन्धूनां त्रयीं न श्रुतिगोचरा।**
**कर्मश्रेयसिमूढानांश्रेय एवंभवेदिह।**
**इतिभारतमाख्यानं कृपयामुनीनां कृतम्।।**[45]

अस्य परिणामस्वरूपंबुद्धः असमानतायाः दुरीकरणाय सर्वेषुजातिधर्मेषुइतिस्वीकृतवान्।अपि च स्वकर्मानुसारेणमानवस्य गुरुतालघुता च प्रतिष्ठितंभवतीति सः प्रमाणीकृतवान्।स्वेच्छयामानवः धर्मग्रहणंकुर्यात्।फलतः शुद्रादीनां कृतेबौद्धधर्मः सामूहिकरूपेणगृहीतमासीत्।अतः बुद्धः स्वयंमुख्यशिष्यरूपेण शुद्रजात्याः उपालिंगृहीतवान्।

बौद्धधर्मस्य तृतीयमहत्त्वमस्तिसदाचारः।आचरणस्य अभिवृद्धिनिमित्तंबुद्धः अष्टाङ्गिकमार्गस्य उपदेशः प्रदत्तवान्।फलतः एतंगृहीत्वामानवस्य चरित्रं पवित्रं भवेदिति सः स्वीकृतवान्। सः दार्शनिकविषयात् सदाचारस्य महत्त्वातिशयमङ्गीकरोति। एतस्मात् कारणात् विद्वांसः इमं धर्मंनैतिकधर्मत्वेनस्वीकुर्वन्ति।अतः जनानां कृतेबौद्धधर्मः सुग्राह्यंआसीत्।

वैदिककाले यज्ञयागदीनांमहत्त्वमधिकमासीत्। तत्र विविधपशुवलेः व्यवस्थाऽऽसीत्।किन्तुउत्तोरोत्तरसमयेतस्य अपव्यवहारहेतोः पशुयागः केवलमानन्दव्यवहाराय सञ्जातः।ततः भगवान् बुद्धः पशुयागस्य निन्दां कृत्वावेदोक्तविहितहिंसांनिन्दितहिंसात्वेनस्वीकृत्य अहिंसायाः महत्त्वातिशयमङ्गीकृतवान्। एतदर्थंतेनोक्तं यत् –अहिंसापरमो धर्मः।संसारेसर्वेजीवाः सुखेन शान्त्या च तिष्ठेयुः इति करुणाकरबुद्धस्य महत्त्वाकाक्षांआसीत्।पुनरयहिंसाआत्मस्थितेषुरिपुणांदमनेनैव यास्यति।अतः स्वकीयेन्द्रियनिग्रहो एव विशेषवैशिष्ट्यान्तरंतस्य बौद्धधर्मस्य स्वीकृतंवर्त्तते।

**अध्ययन का उद्देश्य**

बौद्धधर्मः सर्वप्रमुखधर्मेषुअन्यतमः अस्ति। भगवान् बुद्धः विभूतिदृशः मानवरूपं शरीरंधृत्वामानवस्य कल्याणाय पृथिवीपृष्ठे अवतीर्यअस्य धर्मस्य प्रतिष्ठां कृतवान्। सः समयानुकुलताहेतोः तथासमाजस्य विविधाः अवस्थाः परिलक्ष्य अस्य धर्मस्य स्थापनं कृतवान्।तदधुनापिसमग्रविश्वेवास्तवरूपेणप्रभावंप्रतिपादयति। तेनप्रचारितबौद्धधर्मेणसमाजस्य औत्कर्ष्यं स साधितवान्।

P: ISSN NO.: 2321-290X RNI : UPBIL/2013/55327 VOL-6* ISSUE-7* (Part-1) March- 2019
E: ISSN NO.: 2349-980X **Shrinkhla Ek Shodhparak Vaicharik Patrika**

एतस्मिन् धर्मेबुद्धिवादः, मानवस्य समानाधिकारः, सदाचारस्य महत्त्वं, अहिंसायाः पालनंतथाआत्मोन्नतिनिमित्तंप्रचेष्टावर्णितमस्ति। एतैः कारणैः समाजेअस्य धर्मस्य महत्त्वंपरिलक्ष्यते।अतः भगवतः बुद्धस्य सनातनधर्मस्य अवतारभेदेषुग्रहणमुचितंप्रतिभाति।अवतारत्वेनतदुपदेशः समग्रमानवसमाजाय कल्याणकरमेव। एतदर्थमेवविषयोऽयं शोधलेखेस्वीकृतः।

**निष्कर्ष**

भगवान् बुद्धः मानवरूपं शरीरं धृत्वामानवस्य कल्याणाय सततंचेष्टितवान्।तेनप्रचारितबौद्धधर्मेणसमाजस्य औत्कर्ष्यं स साधितवान्। एतस्मिन् धर्मेबुद्धिवादः, मानवस्य समानाधिकारः, सदाचारस्य महत्त्वं, अहिंसायाः पालनंतथाआत्मोन्नतिनिमित्तंप्रचेष्टावर्णिताऽस्ति। एतैः कारणैः समाजेअस्य धर्मस्य महत्त्वंपरिलक्ष्यते।

1. *पाणिनीय अष्टाध्यायी, ३.३.१२०*
2. *श्रीमद्भगवद्गीता, २.२८*
3. *तत्रैव, ४.७–८*
4. *तत्रैव, २.२८*
5. *श्रीमद्भागवतपुराणम्, ११.२.४५*
6. *पद्मपुराणम्, उत्तरखण्डः, ६२.२२*
7. *गर्गसंहिता, १.१.१६*
8. *जगृहेपौरुषं रूपंभगवान्महदादिभिः ।*
   *सम्भूतं षोडषकलमादौलोकसिसृक्षया ।।*
   *(श्रीमद्भागवतपुराणम्, १.३.१)*
9. *पादोऽस्य विश्वाभूतानि त्रिपादस्यामृतंदिवि ।*
   *(ऋग्वेदः,१०.१०.३)*
10. *येषामन्तर्गतोविष्णुः कार्यकृत्वाविनिर्गतः ।*
    *तानाऽऽवेशावताराश्चविद्धि राजन् महमते ।।,*
    *गर्गसंहिता, 1.1.21*
11. *श्रीमद्भगवतगीता, 15.13–15*
12. *श्रीमद्भागवतपुराणम्, 2.6.41*
13. *एतत्भागवतो रूपंब्रह्मणः परमात्मनः ।*
    *परंप्रधानंपुरुषं दैवंकर्मविचष्टितम् ।।*
    *(इ) रूपभेदास्पदंदिव्यंकालइत्यभिधीयते ।*
    *भूतानांमहदादीनां यतोभिन्नदृशांभयम् ।।*
    *(ब) योऽन्तः प्रविश्य भूतानिभूतैरत्त्यालाश्रयः ।*
    *स विष्वारव्याऽधियज्ञाऽसौकालः कलयतांप्रभुः ।।*
    *श्रीमद्भागवतपुराणम्, 3.29.36–38*
14. *तदेवसर्वमेवैतद्व्यक्ताव्यक्तस्वरूपवत् ।*
    *तथापुरुषरूपेणकालरूपेण च स्थितम् ।।विष्णुपुराणम्, १.२.१४*
15. *भागवतपुराणम्, १.३, भागवतपुराणम्, ३.७, भागवतपुराणम्, ११.४*
16. *यथाहिचोरः स तथाहिबुद्ध*
    *स्तथागतंनास्तिकमत्र विद्धि ।*
    *तस्माद्धि यः शक्यतमः प्रजानां*
    *स नास्तिकेनाभिमुखोबुधः स्यात् ।। रामायणम्, २.१०६.३४*
17. *दानवास्तुवशे कृत्वापुनर्बुद्धत्वमागतः ।*
    *सर्गस्य रक्षाणार्थाय तस्मैबुद्धात्मनेनमः ।। महामहारतम्, १२.४७.४८*
18. *इत्युक्त्वोभगवांस्तेभ्योमायामोहं शरीरतः ।*
    *समुत्पाद्य ददौविष्णुः प्राहचेदंसुरोत्तमान् ।।*
    *विष्णुपुराणम्, ३.१७.४१*
19. *स्वर्गार्थं यदि वो वाञ्छानिर्वाणार्थमर्थासुराः ।*
    *तदलंपशुघातादिदुष्टधर्मौर्निबोधत ।। तत्रैवम्, ३.१८.१७*
20. *एवंबुध्यतबुध्यध्वंबुध्यतैवमितीरयन् ।*
    *मायामोहः स दैत्यान्धर्ममत्याजयन्निजम् ।। तत्रैवम्, ३.१८.२०*
21. *ततः कलौसम्प्रवृत्तेसम्मोहाय सुरद्विषाम् ।*
    *बुद्धोनाम्नाजनसुतः कीकटेषुभविष्यति ।।*
    *भागवतपुराणम्, १.३.२४*
22. *देवद्विषांनिगमवर्त्मनिनिष्ठितानां*
    *पूर्भिर्मयेनविहिताभिरदृश्यतूर्भिः ।*
    *लोकान् घ्नतांमतिविमाहमतिप्रलोभं*
    *वेषंविधाय बहुभाष्यतऔपधर्म्यम् ।। भागवतपुराणम्, २.७.३७*
23. *भूमेर्भरावतरणाय यदुष्वजन्मा*
    *जातः करिष्यतिसुरैरपिदुष्कराणि ।*
    *वादैर्विमोहयति यज्ञकृतोऽतदर्हान्*
    *शूद्रान् कलौक्षितिभुजोन्यहनिष्यदन्ते ।। तत्रैवम्, ११.४.२२*
24. *द्वैपायनोभगवानप्रबोधाद्*
    *बुद्धस्तुपाखण्डगणात् प्रमादात् ।*
    *कल्किः कलेः कालमलात् प्रपातु*
    *धर्मावनयोरूकृतावतारः ।। तत्रैवम्, ६.८.१६*
    *(इ) नमोबुद्धाय शुद्धाय दैत्यदानवमोहिने ।*
    *म्लेच्छप्रायक्षत्रहन्त्रे नमस्तेकल्किरूपिणे ।। तत्रैवम्, १०.४०.२२*
25. *ततः कलेस्तुसन्ध्यान्तेसमोहाय सुरद्विषाम् ।*
    *बुद्धोनाम्नाजिनसुतः कीकटेषुभविष्यति ।। गरुडपुराणम्, १.१.३२*
26. *रक्ष रक्षेति शरणंवदन्तोजग्मरीश्वरम् ।*
    *मायामोहस्वरूपोसौ शुद्धादनसूतोऽभवत्*
    *मोहयामासदैत्यांस्तांस्त्याजितावेदधर्मकम्*
    *ते च बौद्धाबभूवुर्हितेभ्यान्येवेदवजिताः ।। अग्निपुराणम्, १६.१.४*
27. *तारोदराद्विनिष्क्रान्तः कुमारश्चन्द्रसिनिभः ।*
    *सर्वार्थशास्त्रविद्धीमान्हस्तिशास्त्रप्रवर्तकः ।।*
    *मत्स्यपुराणम्, २४.२*
    *नाम यद्राजपुत्रीय विश्रुतंगजवैद्यकम् ।*
    *राजः सोमस्य पुत्रत्वाद्राजपुत्रोबुद्धःस्मृतः ।। तत्रैवम्, २४.३*
28. *स सर्वसत्त्वापकृतिप्रयत्नः कृपाकुलः शाक्यकुलेविशाले ।*
    *शुद्धोदनाख्यस्य नराधिपन्द्रोर्धन्यस्य गर्भेऽवतारपत्न्याः ।।*
    *दशावतारचरितम्, ६.२*
29. *जात्यवमारः शमनिश्चलानांवैराग्यवैरेण्य विकारकारी ।*
    *तस्यन्दुकान्त्येव कृताः समाधिभङ्गाय कान्ताः स समादिदेश ।। दशावतारचरितम्, ६.४१*
30. *कटाक्षैः कुर्वाणाः कुवलयकुलंकान्तिविकलं*
31. *सृजन्त्यःपादाब्जैः स्थलकमलमालामलिनताम् ।*
    *दिशन्त्यः शीताशोर्मुखरुचिभरायासमसमं*
    *ययुस्तास्तस्याग्रेधृतदृढसमाधेर्विफलताम् ।। तत्रैवम्, ६.४२*

32. *दशावतारचरितम्, ६.७४*
33. *निन्दसि यज्ञविधेरहहश्रुतिजातम्*
*सदयहृदय दर्शितपशुघातम् ।*
*केशवधृतबुद्धशरीर*
*जय जगदीशहरे ।। गीतगोविन्दम्, १.६*
34. *श्रीसारदातिलक, १६.१६३*
35. *विनयपत्रिका, गीताप्रेस, गोरखपुर, ५२.८*
36. *बृहत्पाराशरहोरशास्त्रम्,२.५*
37. *महायान, पृ. ७८*
38. *बौद्धा शौद्धोदनाद्यग्रे कृत्वातामग्रतः पुनः ।*
*योद्धु समागताम्लेच्छकोटिलक्षशतैर्वृताः ।।*
*(कल्किपुराणम्, २.७.३८)*
39. *Buddhism& Its History and Literature, page no. 206.207*
40. *करण्डव्युहः, पृ.४२*
41. *तत्रैवम्,*
42. *महायानसूत्रालंकार, ११.३*
43. *श्रीमद्भगवद्गीता, १६.२४*
44. *तत्रैवम्, ५.१८*
45. *श्रीमद्भागवतम्, १.४.२५*